CC-0. Digitized by eGangotri and MIDF- Delhi

कौमुदी व्याकरण

८५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गति १

श्रीगणेशाय नमः ॥ ॥ लट् ॥ लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् ॥ एषु पं
चमो लकारश्छंदोमात्रगोचरः ॥ लः कर्मणि च भावे चाकर्मकेभ्यः ॥ लकाराः सकर्मकेभ्यः कर्म
णि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च ॥ वर्त्तमाने लट् ॥ वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्या
त् ॥ अटावितौ । उच्चारणसामर्थ्याल्लस्य नेत्वं ॥ भू सत्तायां । कर्त्तृविवक्षायां भू ल् इति स्थिते॰
देशाः स्युः ॥ लः परस्मैपदं ॥ लादेशाः परस्मैपदसंज्ञाः स्युः ॥ तङानावात्मनेपदं ॥ तङ् प्रत्या
हारः शानच्कानचौ वे तत्संज्ञाः स्युः ॥ पूर्वसंज्ञापवादः ॥ अनुदात्तङित आत्मनेपदं ॥ अनुदा
त्तेत उपदेशे यो ङित् तदंताच्च धातोरात्मनेपदं स्यात् ॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥

फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वं फलसमानाधिकर्मव्यापारशुद्धः वाचकत्वं अकर्मकत्वं

२ तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ॥ एते अष्टादश लादेशाः २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्तृगामिनि क्रियाफले ॥ शेषात्कर्त्तरि परस्मैपदं
आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् ॥ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्त
माः ॥ तिङ् उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञास्युः ॥ तान्येकवचनदिवचनबहुवचना
न्येकशः ॥ लब्धप्रथमादिसंज्ञानि तिङः स्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥ युष्मद्यु
पपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमा
नेऽप्रयुज्यमाने च मध्यमः ॥ अस्मद्युत्तमः ॥ तथाभूतेऽस्मद्युत्तमः ॥ शेषे प्रथमः ॥ मध्यमो
त्तमयोरविषये प्रथमः स्यात् ॥ भू ति इति जाते ॥ तिङ्शित्सार्वधातुकं ॥ तिङ् शितश्च धा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ॰ति त्वधिकारोऽप्रा एतन्संज्ञाः स्युः॥ कर्त्तरि शप्॥ कर्त्रर्थे सार्वधातुके परे धातोः शप्॥ सार्वधातुकार्द्धधा
२ तुकयोः॥ अनयोः परयो रिगंताङ्गस्य गुणः॥ अवादेशः॥ भवति॥ भवतः॥ झेरन्तः॥ प्रत्ययावय
वस्य झस्यान्तादेशः॥ अन्तगुणो॥ भवंति॥ भवसि॥ भवथः॥ भवथ॥ अतो दीर्घो यञि॥ अतोंगस्य
दीर्घो यञादौ सार्वधातुके परे॥ भवामि॥ भवावः॥ भवामः॥ स भवति॥ तौ भवतः॥ ते भवंति॥
त्वं भवसि॥ युवां भवथः॥ यूयं भवथ॥ अहं भवामि॥ आवां भवावः॥ वयं भवामः॥ शेषे विभा
षा कर्त्ता सार्वधातुके उपदेशे॥ उपदेशे कादिः स्वादिषान्तवर्ज्जं गदनदादेर्न्युपसर्गस्थान्तादुपसर्ग उप॰
स्थान्निमित्तात्परस्य नेर्णत्वं स्याद्वा॥ प्रणिभवति॥ प्रनिभवति॥ परोक्षे लिट्॥ भूतानद्यतन २

अतीतायारात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः तद्व्यतिरिक्तोऽनद्यतनः १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परोक्षार्थवृत्तेर्धातोर्लिट् स्यात्॥ लस्य तिबादयः॥ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः
लिटस्तिबादीनां नवानां णलादयो नव स्युः॥ भू अ इति स्थिते॥ भुवो वुग्लुङ्लिटोः॥ भुवो वुगागमः
स्याल्लुङ्लिटोरचि परे॥ लिटि धातोरनभ्यासस्य॥ लिटि परे अनभ्यासस्य धातोरवयवस्यैका
चः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य॥ भूव् भूव् अ इति जाते। पूर्वोऽभ्यासः। अत्र
ये द्वे तयोः पूर्वोऽभ्याससंज्ञं स्यात्॥ हलादिः शेषः॥ अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यंते
ह्रस्वः॥ अभ्यासस्याचो ह्रस्वः स्यात्॥ भवतेरः॥ भवतेरभ्यासोकारस्य अः स्याल्लिटि। अभ्यासेच
र्च। अभ्यासे झलां चरः स्युर्जशश्च। झशां जशः। खयां चरः इति विवेकः। बभूव। बभूवतुः। बभूवुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ.ति लिट् च ।। लिडादेशस्तिङार्द्धधातुकसंज्ञः ।। आर्द्धधातुकस्येड्वलादेः ।। वलादेरार्द्धधातुकस्येडागमः स्या
३ त् । बभूविथ । बभूवथुः । बभूव । बभूविव । बभूविम ।। अनद्यतने लुट् ।। भविष्यत्यनद्यतनेर्थे धातो
र्लुट् । स्यतासी लृलुटोः । धातोरेतौ स्तः । लृलुटोः परतः । शबाद्यपवादः । लृ इति लृङ्लृटोर्ग्रहणं ।। आ
र्द्धधातुकं शेषः ।। तिङ्शिभ्योऽन्यो धातोरिति विहितप्रत्यय एतत्संज्ञः स्यात् ।। इट् । लुटः प्रथमस्य
डारौरसः ।। डित्वसामर्थ्यादभस्यापि टेर्लोपः ।। भविता । तासस्त्योर्लोपः । सादौ प्रत्यये परे ।
रि च ।। रादौ प्रत्यये तथा । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि
भवितास्वः । भवितास्मः ।। लृट् शेषे च ।। भविष्यदर्थाद्धातोर्लृट् क्रियार्थायां क्रियायां सत्याम ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

४ म... [illegible] ...देशः। ननु ङिः चेत्तस्य [illegible] सर्वादेशः [illegible]। अनन्यार्थाङिः [illegible] ४

CC-0. Digitized by eGangotri and MIDF - Delhi

तङ्वा। परत्वात्सर्वादेशः। ननु ङित्वात्तस्यान्त्यस्य कथं इति चेत् [illegible]। अनन्यार्थाङित्त्वेष्व=४

मत्यां वा स्युः। ऌट्। भविष्यति। भविष्यतः। भविष्यंति। भविष्यसि। भविष्यथः। भविष्यथ। भ

विष्यामि। भविष्यावः। भविष्यामः।। लोट् वा।। विध्यादिष्वर्थे भूधातोर्लोट्।। आशिषि लिङ्

लोटौ।। एरुः। लोट इकारस्य उः। भवतु।। तुह्योस्तातङाशिष्यन्यतरस्याम्।। आशिषि तुह्योस्ता

तङादिर्विधिग्रहणात्। भवतात्। लोटोलङ्वत्। लोट तामादयः स्युः।। तस्थस्थमिपां तांतंतं

मः। ङित्त्वनुवर्णी तामादयः स्युः। भवतां। भवंतु। सेर्ह्यपिच्च। लोटः सेर्हिः स्यात्सोपिच्च। अतो हेः

अतः परस्य हेर्लुक् स्यात्। भव। भवतात्। भवतं। भवत। मेर्निः। लोटः। आडुत्तमस्य पिच्च

लोट उत्तमस्याट् स्यात्पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि। ते प्राग्धातोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः। आनिलोट्। उपसर्गस्थान्निमित्तात्परस्य लोडादे
शस्यानीत्यस्य नस्य णत्वं स्यात्॥ प्रभवाणि। दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः।
४ दुःस्थितिः। दुर्भवाणि। अंतःशब्दस्यांकिविधिणत्वेषूपसर्गत्वं वाच्यम्। अंतर्भवाणि। नित्यं ङि
तः। सकारांतस्य ङित उत्तमस्य नित्यं लोपः। अलोन्त्यस्येति सलोपः। भवाव। भवाम। अनद्यतन
ने लङ्। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्॥ लुङ्लङ्लृङ्क्ष्वडुदात्तः। एष्वंगस्याट्
इतश्च। ङितो लस्य परस्मैपदमिकारांतं यत्तस्य लोपः॥ अभवत्। अभवतां। अभवन्। अ
भवः। अभवतं। अभवत। अभवं। अभवाव। अभवाम॥ विधिनिमंत्रणामंत्रणाधीष्ट ४

भूयात्। भूयास्तां। भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। लुङ्। भूतार्थवृत्तेर्धा
स॰ति तोर्लुङ्। माङि लुङ्। सर्वलकारापवादः॥ स्मोत्तरे लङ् च। स्मोत्तरे माङि लङ् स्यात् लुङ् च। द्विलुङि। ह्यावाद्य
५ पवादः॥ इः सिचि। गातिस्थापाभूभ्यः सिचः परस्मैपदेषु लुक्। गापाविहेणादेशपिवतिगृह्येते। भूसु
वोस्तिङि। भूसू एतयोः सार्वधातुके तिङि गुणो न। अभूत्। अभूतां। अभूवन्। अभूः। अभूतं। अभूत।
अभूवं। अभूव। अभूम। न माङ्योगे। अडागमो न स्यात्। मा भवान् भूत्। मा स्म भवत्। लिङ्निमित्ते
लृङ् क्रियातिपत्तौ। हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यदर्थे लृङ्। क्रियायाः अनिष्पत्तौ गम्य धा॰ ११
मानायां। अभविष्यत्। अभविष्यतां। अभविष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत। अभ ५

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संप्रश्नप्रार्थनेषु लिङ्। एष्वर्थेषु लिङ्। यासुट् परस्मैपदेषूदात्तो ङिच्च। लिङः परस्मैपदा-
नां यासुडागमो ङिच्च। ङित्वोक्तेर्यापते क्ङिति चेति वृद्ध्यादिकार्ये प्राप्ते लिङ्विधाविति प्रतिषेध इति। नि-
न वक्ष्यमाणो सवङी प्रना। लिङः सलोपोऽनन्त्यस्य। सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः॥
इति प्राप्ते। अतो येयः। अतः परस्य सार्वधातुकावयवस्य यास इत्यस्य इय्। गुणः। लोपो व्यो-
र्वलि। भवेत्। भवेताम्। झेर्जुस्। लिङ्। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवे-
म। लिङाशिषि। आशिषि लिङ् लिङार्धधातुकसंज्ञं स्यात्। किदाशिषि। आशिषि लिङो
यासुट् कित्। स्कोरिति सलोपः॥ क्ङिति च। क्ङिति निमित्ते इग्लक्षणो गुणवृद्धिर्न स्तः।

रको.१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विष्यं।अभविष्याव।अभविष्याम।गुरुष्टिश्चेदभविष्यन्नदासुभिक्षमभविष्यत्।इत्यादिज्ञेयम्।
प्रभवतीत्यादेउपसर्गाणामसमस्तत्वेपिसंहितानित्या।तदुक्तं।संहितैकपदेनित्यानित्याधातू
पसर्गयोः।नित्यासमासेवाक्येतुसाविवक्षामपेक्षते॥तत्रायथार्थनिर्देशश्चोपलक्षणं॥पागात्व
र्गोभवतीत्यादावुत्पद्यतइत्याद्यर्थात्।उपसर्गास्त्वर्थविशेषद्योतकाः।प्रभवति।पराभवति।
संभवति।अभिभवति।अनुभवति।उद्भवति।परिभवतीत्यादौविलक्षणार्थावगतेः।उक्तंच
उपसर्गेणधात्वर्थोबलादन्यत्रनीयते।प्रहाराहारसंहारविहारपरिहारवदिति॥अतसातत्य
गमने।अतति।अतआदेः।अभ्यासस्यादेरतोदीर्घः।पररूपापवादः।आत।आततुः।आतुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आतिथ।आनष्टुः।आतिष।आन्न।आतिव।आतिम।आतिन्।आतिष्यति।आनन्।आडजादीनां॥
म॰ति अजादेरंगस्याट् लुङ् लङ् लृङ् क्ष॥आनन्।अतेन्।अन्यात।अन्यात्सां॥ङिःसिवी डागमेक्ष्क्रते॥अ
६ स्तिसिचो पृक्ते॥विद्यमानात्सिचो स्तेश्च परस्यापृक्तस्य हल ईडागमः।इट ईटि।इटः परस्य स
स्य लोपः स्यादीटि॥सिञ्लो पएकादेशोसिद्धो वाच्यः॥आतीन्।आतिष्टां॥सिजभ्यस्तविदिभ्यश्च
सिचोभ्यस्ताद्विदेश्च ङित्संबंधिनो झेर्जुस्॥आतिषुः।आतीः।आतिष्टं।आतिष्ट।आतिषं।आति
ष्व।आतिष्म।आतिष्यत्॥एवं अवरक्षणगतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्य गुरुः
र्थयाचनक्रियेच्छादीप्त्यावाप्त्यालिंगनहिंसादानभागवृद्धिषु॥अवतीत्यादि॥धिवु गत्यां॥ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नतुदस्योष्ठजोपि। ३

गंतलघूपधस्य च। पुगंतस्य लघूपधस्य चांगस्येको गुणः॥ सार्वधातुकार्द्धधातुकयोः। धात्वादेरि
तिसः। सेधति। षत्वं। सिषेध। सेक्सृप्सृस्तृसृजस्तृस्त्यान्येदंत्याजंतसादयः। एकाचः षोपदेशा
स्युः। ष्वष्क स्विद् स्वद् स्वंज स्वप् स्मिङः। दंत्यः केवलदंत्यः। ष्वष्कादीनां पृथग्ग्रहणात्॥ असंयोगा
ल्लिट् कित्। असंयोगात्परो पिल्लिट् कित्॥ सिषिधतुः॥ सिषिधुः॥ सिषेधिथ॥ सिषिधथुः॥ सि
षिध॥ सिषेध॥ सिषिधिव॥ सिषिधिम॥ सेधिता॥ सेधिष्यति॥ सेधतु॥ असेधत्॥ सेधेत्॥ सिध्या
त्॥ असेधीत्॥ असेधिष्यत्॥ सात्पदाद्योः॥ सस्य षो न॥ इति निषेधे प्राप्ते॥ उपसर्गात्सुनोति
सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्जां॥ उपसर्गस्थान्निमित्तात्परस्य एषां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

सरदंधुंक्तेरस्थ: १
२ विष्वगति

CC-0. Digitized by eGangotri and MIDF- Delhi

षनि सस्य षः। अवाच्चालंबनाविदूर्ययोः। अवात्स्तंभेरेनयोः सस्य षः। वेश्च स्वनो भोजने। व्यवाभ्यां परस्य स्वनतेः सस्य
८ षो भोजने। परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां। परिनिविभ्यः परेषां एषां सस्य षः। निषेधति
प्राक्सितादड्व्यवायेपि। सेवसितेत्यत्रसितशब्दात्प्राग्ये सुनोत्यादयः तेषामड्व्यवायेपि सस्य षः स्यात्।
न्यषेधत्। न्यषेधीत्। स्थादिष्वभ्यासेन चाभ्यासस्य। प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्। ए
षामेवाभ्यासस्य न तु सुनोत्यादीनां। निषिषेध। निषिषिधतुः। सेधतेर्गतौ। गत्यर्थस्य सेधतेः सस्य षो न
गंगां विसेधति। एवं वितीसंज्ञाने। शुवशोके। गद व्यक्तायां वाचि। गदति। गदतः। नेर्गदनदपतपदघुमा उह्रः
स्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। उपसर्गस्थान्निमित्तात्परस्य ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेर्णिगदादिषु परेषु। प्रणिगदति। कुहोश्चुः। अभ्यासस्य कवर्गहकारयोश्चवर्गादेशः। अत उपधायाः वृद्धिः स्यात् ञ्णि
ति णिति च प्रत्यये परे।। जगाद। जगदतुः। जगदुः। जगदिथ। जगदथुः। जगद। णलुत्तमो वा। णित् वा स्यात् जगाद। जग
द। जगदिव। जगदिम। गदिता। गदिष्यति। गदतु। अगदत्। गदेत्। गद्यात्। अतो हलादेर्लघोः। हलादेर्लघोर
कारस्य वृद्धिर्वेडादौ सिचि परस्मैपदे। अगादीत्। अगदीत्। अगदिष्यत्। णद अव्यक्ते शब्दे। णो नः। धात्वादेर्णस्य नः
णोपदेशास्तु नर्दनाटिनाथ्नाध्नन्दनक्कनॄनृतः। उपसर्गादसमासेऽपि णोपदेशस्य। उपसर्गस्थान्निमित्तात्पर
स्य णोपदेशस्य धातोर्नस्य णः। प्रणदति। प्रणिनदति। नदति। ननाद। अत एकहल्मध्येऽनादेशादेर्लिटि।। लिनि दे २
मित्तादेशादिकं न भवतिसदंगं तदवयवस्यासंयुक्तहल्मध्यस्थस्यात एत्वमभ्यासलोपश्चाकिति लिटि। नेदतुः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मति नेदुः। थलि वसेटि। इडुत्ति थलि व प्राउक्तं स्यात्। नेदिथ। नेदथुः। नेद। ननाद। ननद। नेदिव। नेदिम॥ नदिता। नदिष्य
८ ति। नदतु। अनदत्। नदेत्। नद्यात्। अनादीत्। अनदीत्। अनादिष्यत्॥ श्च्युतिर् क्षरणे। इरइत्संज्ञा वाच्या। श्चोतति। श्च
पूर्वो [illegible]खयः। शि व्यं तेभ्यास स्य:। हलादिः शेषापवादः। चुश्चोत। इरितो वा। इरितो धातोश्च्ले रङ्वा परस्मैपदपरे। अश्चु
तत्। अश्चोतीत्। चकाररहितो प्ययं श्चोतति। उश्चोत। अश्चुतत्। अश्चोतीत्। श्रुति आसेचने। श्योतति। टुनदि
समृद्धौ। आदिर्ञिटुडवः। उपदेशे धातोराद्या एते इतः स्युः। इदितो नुम् धातोः। नंदति। ननंद। नंदिता। नंदिष्यति। न
न्दतु। अनंदत्। नंदेत्। नंद्यात्। अनंदीत्। अनंदिष्यत्। एवं ञिपिवृ थितु थि मथि मंथ हिंसासंक्लेशनयोः। विदि शुह्
अवयवे। भिदीति पाठांतरं। गडि वदनैकदेशे। वदि आह्लादे। वदि चेष्टायां। कदि क्रदि क्लदि आह्वाने रोदने वल ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

विलापः परिदेवनमित्यमरः॥ १

CC-0. Digitized by eGangotri and MIDF- Delhi

क्लिदि परिदेवने। नपिक्ल छुजीक्ने। भुगि जगि बुगि वर्जने। मथि मंडने। शिघि आघ्राणे। मंथ विलोडने। मंथति। म
मंथ। क्नित्वान्नलोपः। मथ्यात्। अर्व पूजायां। अर्वति। तस्मान्नुट् द्विहलः। द्विहलो धातो दीर्घाभ्यासादन्तः परस्मान्नुट्
आनर्व। आनर्वतुः। अर्विता। अर्विष्यति। अर्वतु। आर्वत्। अर्वेत्। अर्व्यात्। आर्वीत्। आर्विष्यत्। एवं अर्द गतौ
याचने च। अति अदि बंधने। वन षण संभक्तौ। वनति। ववान। न शसददवादिगुणानां। शसेर्ददेर्वकारादीनां गु
णशब्देन विहितो यो अस्य एत्वाभ्यासलोपौ न। ववनतुः। ववनुः। सनति। ससान। सेनतुः ये विभाषा। जनसनख
नां सञ्झलोः आत्वं वा स्यात् यि क्ङिति वा। सायात्। सन्यात्। वद व्रज गतौ। व्रजति। वव्राज। व्रजिता। व्रजिष्यति। व्रजतु। अव्रज
त्। व्रजेत्। व्रज्यात्। वदव्रजहलन्तस्याचः। एषामचो वृद्धिः सिचि परस्मैपदेषु। अव्राजीत्। अव्रजिष्यत्। क

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म·ति ठेवर्णविरामयोः। कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्। कटेत्। कट्यात्। ह्म्यन्तक्षणश्वसजागृणिश्व्ये
९ दितां। ह्मयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि। अकटीत्। अकटिष्यत्। गुपू रक्षणे
गुपूधूपविच्छिपणिपनिभ्यः आयः। स्वार्थे। सनाद्यंता धातवः। सनादयः क्रमेणोक्ताः प्रत्ययाः अंते येषां ते
धातुसंज्ञकाः। सन्·क्यच्·काम्यच्·क्यष्·क्य·षोप्या·यार·क्वि·विजय·ङौ·तथा॥ यगाय·इयङ्·णिङ् चेति।।
द्वादशामी सनादयः। सनाद्यंता धातव इत्यस्यानंतरं भूवादय इत्यस्यैव सूत्रस्य वृत्तिः। धातुत्वाल्लडादयः। गोपाय
ति। आयादय आर्धधातुके वा। आर्धधातुकविवक्षायामायादयो वा स्युः। कास्यनेकाच आम् वक्तव्यो लिटि गु हं
कासआम्विधानान्मस्य नेत्वं। अतो लोपः। आर्धधातुकोपदेशे यददंतं तस्यातो लोप आर्धधातुके। आमः। आ ९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मः परस्य लुक्॥ कृञ्चानुप्रयुज्यते लिटि॥ आमंताद्द्विरुक्तपराः कृभ्वस्तयोऽनुप्रयुज्यन्ते। तेषां द्वित्वादि॥
उत्तरत्र॥ अभ्यासस्यानतोऽन्त्॥ तृह्निः गोपायांचकार। द्वित्वात्परत्वाद्यणि प्राप्ते द्विर्वचनेऽचि। द्वित्वनिमित्ते
ऽचि अच आदेशो न द्वित्वे कर्त्तव्ये। गोपायांचकतुः। गोपायांचक्रुः। एकाच उपदेशेऽनुदात्तात्। उपदेशो यो ८
धातुरेकाजनुदात्तश्च ततआर्द्धधातुकस्येण्न। ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः। वृङ्वृञ्
भ्यां च विनैकाचोऽजंतेषु निहताः स्मृताः। कांतेषु शक्लृ एकः। चांतेषु पच्मुच्रिच्वच्विच्सिचां षट्। छां
तेषु प्रछ एकः। जांतेषु त्यज्निजिर्भज्भञ्ज्भुज्भ्रस्ज्मस्ज्यज्युज्रुज्रञ्ज्विजिर्स्वञ्ज्सञ्ज्सृजः पंचद
श। दांतेषु अद्क्षुद्खिद्छिद्तुद्नुद्पद्यभिद्विद्यविनद्विद्ॢशद्सद्स्विद्यस्कंदहदः षोडश॥

मल २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सां॰ते॰षु॰ घस्वसतौ द्वौ ॥४

म॰ति॰ धांतेषु क्रुध् क्षुध् शुध्य बुध्य बंध् युध् रुध् राध् व्यध् शुध् साध् सिध्याः एकादश। नांतेषु
१० मन्य हनौ द्वौ। पांतेषु आप् क्षिप् क्षुप् तप् तिप् तृप्य दृप्य लिप् लुप् वप् शप् स्वप् सृप् त्रयोदश। भां-
तेषु यभ् रभ् लभस्त्रयः। मांतेषु गम् नम् यम् रम् चत्वारः। शांतेषु क्रुश् दंश् दिश् दृश् मृश् रिश् रुश् लि-
श् विश् स्पृशो दश। षांतेषु कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्याः एकादश। सां-
तेषु दह् दिह् दुह् नह् मिह् रुह् लिह् वहो ष्टौ। अनुदात्ता हलंतेषु धातवस्त्र्यधिकं शतं। गोपायांचकर्थ
गोपायांचक्रथुः। गोपायांचक्र। गोपायांचकार। गोपायांचकर। गोपायांचकृव। गोपायांचकृम। गुपूः
गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। जुगुपुः। सानि सूनि सूपनि धूपचिपनो वा। स्व १०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्यादेरूदितश्च परस्य वलादेरार्द्धधातुकस्येड्वा। जुगोपिथ। जुगोप्थ। गोपायिता। गोपिता। गो
प्ता। गोपायिष्यति। गोपिष्यति। गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्। गोपाय्यात्
गुप्यात्। अगोपायीत्। नेटीड्यादौ सिचि हलंतलक्षणा वृद्धिर्न। अगोपीत्। अगौप्सीत्। झलोझ
लि। झलः परस्य सस्य लोपः स्याज्झलि। अगौप्तां। अगौप्सुः। अगौप्सीः। अगौप्तं। अगौप्त। अगौप्सं
अगौप्स्व। अगौप्स्म। अगोपायिष्यत्। अगोपिष्यत्। अगोप्स्यत्। क्षि क्षये। क्षयति। विक्षाय
विक्षियतुः। विक्षियुः। एकाच इति निषेधे प्राप्ते। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि। क्रादिभ्य एव लिट्
इत्नेष्यादन्यस्मादनिटोपि स्यात्॥ अचस्तास्वत्थल्यनिटो नित्यं। उपदेशेऽजंतो यो धातुस्तासौ नित्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म॰ति निरुदन्तस्य थल इट् न । उपदेशेऽत्वतः । उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इट् न ।। अतो भ
११ भारद्वाजस्य । तासौ नित्यानिटः अदन्तादेव थलो नेट् भारद्वाजस्य मते । तेनान्यस्य स्यादेव । अयमत्र
त्रसंग्रहः ।। अजन्तोकारवान्वा यस्तास्यनिट् थलि वेडयं ।। अदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि
सेड्भवेत् ।। १ ।। विक्षपिथ । विक्षेथ । विक्षिपथुः । विक्षिप । विक्षाप । विक्षिप । विक्षिपिव । विक्षि
पिम ।। अन्यस्येत्यस्य ककारान्तभिन्नस्य तासौ नित्यानिटः उपदेशेऽजन्तस्यात्वतश्चेत्यर्थः ।। ३ ।।
क्षेप्स्यति । क्षिपतु । अक्षिपत् । क्षिपेत् । अकृत्सार्वधातुकयोर्दीर्घः । अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्र गुरुः
त्ययेन तु कृत्सार्वधातुकयोः । क्षीयात् । सिचि वृद्धिः परस्मैपदेषु । इगन्ताङ्गस्य वृद्धिः परस्मैपदेषि ११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्वि। अक्षैषीत्। अक्षेष्यत्। तप संतापे। तपति। तताप। तेपतुः। तेपुः। तेपिथ। ततप्थ। तप्ता। तप्स्यति
तपतु। अतपत्। तपेत्। तप्यात्। अताप्सीत्। अताप्तां। अतप्स्यत्। निसस्तपतावनासेवने। षं स्या
त्। आसेवनं पौनःपुन्यं ततोन्यस्मिन्विषये। निष्टपति। क्रमु पादविक्षेपे। वा भ्राशभ्लाशभ्रमुक्रमु
क्लमुत्रसित्रुटिलषः। श्यन्वा कर्तरि सार्वधातुके। पक्षे शप्। क्रमः परस्मैपदेषु। क्रमे दीर्घः प
रस्मैपदे शिति। क्राम्यति। क्रामति। चक्राम। स्नुक्रमोरनात्मनेपदनिमित्ते। अत्रैवेट्। क्रमिता।। क्र
मिष्यति।। क्राम्यतु। क्रामतु। अक्राम्यत्। अक्रामत्। क्रामेत्। क्रम्यात्। अक्रमीत्। अक्रमिष्यत्।।
चमु छमु जमु झमु अदने।। ष्ठिवुक्लमुचमां शिति।। अचो दीर्घः।। आङि चम इति वक्तव्यं। आचामति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प॰नि॰ आङः किं त्वमति । विचमति । अचमीत् । स्खल संचलने । स्खलति । चस्खाल । अतो ल्रांतस्य । अतः समीपौ यौ ल्रौ
१२ तदंतस्यांगस्यातो वृद्धिः परस्मैपदे परे सिचि । अस्खालीत् । त्सर छद्मगतौ । अत्सारीत् । पा पाने । पाघ्राध्मास्था
म्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः । पादीनां पिबादयः स्युरित्सं
ज्ञकशादौ प्रत्यये । पिबादेशोऽदंतस्तेन न गुणः । पिबति । आत औ णलः । पपौ । आतो लोप इटि च । अजाद्योरार्द्धधा
तुकयोः क्ङिदिटोः परयोरातो लोपः । पपतुः । पपुः । पपिथ । पपाथ । पपथुः । पप । पपौ । पपिव । पपिम । पा
ता । पास्यति । पिबतु । अपिबत् । पिबेत् । एर्लिङि । घुसंज्ञानां मास्थागेपिबतिजहातिस्यतीनां च एत्वं स्यादार्द्धधातु गु॰रु॰
के लिङि किति । पेयात् । गातिस्थेति सिचो लुक् । अपात् । अपाताम् । आतः । सिज्लुकि आदंतादेव झेर्जुस् । उस्य १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदांतात्। अपदांतादवर्णादुसि पररूपमेकादेशः। अग्लुः। अग्लास्यत्। ग्लै म्लै हर्षक्षये। ग्लायति। आदेच उप
देशेऽशिति। उपदेशे एजंतस्य धातोरात्वं न तु शिति जग्लौ। ग्लाता। ग्लास्यति। ग्लायतु। अग्लायत्। ग्लायेत्
वान्यस्य संयोगादेः। घुमास्थादेरन्यस्य संयोगादेर्धातोरालएत्वं वा आर्द्धधातुके क्ङिति लिङि। ग्लेयात्। ग्ला
यात्। यमरमनमातां सक् च। एषां सक् स्यादेभ्यः सिचइट् परस्मैपदे च। अग्लासीत्। अग्लास्यत्। एवं म्लाय
तीत्यादि। धेट् पाने। धयति। दधौ। दाधाघ्वदाप्। दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना। धेयात्
विभाषा धेट्श्व्योः। आभ्यां च्लेश्चङ् वा। चङि। अनभ्यासस्य धात्ववयवस्य प्रथमस्यैकाचो द्वे स्तोऽजादेर्द्विती
यस्य। अदधत्। अदधतां। विभाषा घ्राधेट्शाच्छासः। एभ्यः सिचो लुग्वा परस्मैपदे। अधात्। अधातां। अधुः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म॰ति॰ पक्षे इट् सकौ। अधासीत्। अधासिष्टां। धैन्यक्करणे। धायति। द्रै स्वप्ने। द्रायति। ध्रै तृप्तौ। ध्रायति। ध्यै चिंतायां। ध्या
१३ यति। रै शब्दे। रायति। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यं। षोपदेशफलं तु
तिष्ट्यासतीत्यादि भविष्यति। खै खदने। क्षै जै षै क्षये। क्षायति। कुमास्येत्यत्र विभाषाघ्राधेङ्‌त्यत्र वक्ष्य
ते रेव ग्रहणं न त्वस्य। तेन एत्वसिज्लुकौ न। क्षायात्। अक्षासीत्। कै गै शब्दे। शै श्रै पाके। पै ओवै शोष
णे। पायात्। अपासीत्। कुमास्येतीत्वं तदपवाद एर्लिङीत्येत्वं गातिस्थेति सिज्लुक् च न लक्षणप्रति
पदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति। पा रूपस्य लाक्षणिकत्वात्। ष्टै वेष्टने। स्तायति। स्नै वेष्टने उ॰कः
शोभायां चेत्येके। स्नायति। दैप् शोधने। दायति। अदुपत्वादेत्वसिज्लुकौ न। दायात्। अदासीत्। घ्रा गंधो १३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पा पाने। जिघ्रति। घ्रायात्। घ्रेयात्। अघ्रासीत्। ध्मा शब्दाग्निसंयोगयोः॥ धमति। ष्ठा गतिनिवृत्तौ। ति
ष्ठति। स्थादिष्वितिषत्वं। अधितिष्ठौ उपसर्गादिति षत्वं। अधिष्ठानास्थेयात्। सत्वेकृते प्रकृति
स्तवर्गः स्यात्॥ नकारजावनुस्वारपंचमौ झलि धातुषु। सकारजः शकारश्चे टुवर्गात् टवर्गस्तवर्ग
जः॥ १ ॥ सिद्धोल्लुक्। अस्थात्। म्ना अभ्यासे। मनति। दाण् दाने। प्रणि यच्छति। ह्वृ कौटिल्ये। ह्व
रति॥ ऋतश्च संयोगादेर्गुणः। ऋदन्तस्य संयोगादेरंगस्य गुणो लिटि। उपधावृद्धिः। जह्वार। जह्वे
रतुः। जह्वरुः। जह्वर्थ। जह्वरथुः। जह्वर॥ जह्वार। जह्वर। जह्वरिव। जह्वरिम॥ ह्वर्यात्॥ ऋद्धनोः स्ये॥
ऋतो हन्तेश्च स्यस्य इट्। ह्वरिष्यति। ह्वरत्। अह्वरत्। ह्वरेत्। गुणोर्तिसंयोगाद्योः॥ अर्त्तेः संयो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म॰ति॰ गादेर्न्सदंतस्य वा गुणो पक्रियायामार्धधातुके लिङि वा। कार्यात्। अकार्षीत्। अकारिष्यत्। स्वृ शब्दोपतापयोः। स्व
१४ रति। स्वरतीति वेट्। सस्वरिथ। सस्वर्थ। वमव्योरुत्स्वरत्यादि विकल्पं वाधित्वा पुरस्तात्प्रतिषेधकांडारंभसा
म३ मर्थ्यात्स्यक्रीकृतीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वादृद्धतो रि नित्यमि
ट्। स्वरिष्यति। स्मृ चिंतायां। स्मरति। ह्वृ संवरणे। ह्वरति। सृ गतौ। कादित्वान्नेट्। ससर्थ। ससृव। रिङ्शय
ग्लिङ्क्षु। शयक्रियादावार्धधातुके लिङि स्मृतोरिङ्। रीङ् प्रस्मृतोरिङ्कित्। सामर्थ्यान्न दीर्घः। स्रियात्। अ
सार्षीत्। धौ त्रपाघ्रेति धौ इत्यादेशः। धावति। घृ सेचने। ध्वृ हूर्च्छने। दृशिर् प्रेक्षणे। पश्यति। उ॰
विभाषा सृजिदृशोः। आभ्यां थलमूङ्वा। सृजिदृशोर्झल्यमकिति। अनयोरमागमः स्यात् झलादावकिति। द १४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दष्ठ। ददर्शिथ। द्रष्टा। षढोः कः सि। द्रक्ष्यति। दृश्यात्। इरितो वा। दङ्वा॥ ऋदृशोऽङि गुणः। ऋवर्णान्तानां दृशो-
श्च गुणः स्यादङि। अदर्शत्। अङ्भावे। नस्त्राः। झलो वक्ष्यमाणाः क्सो न। अद्राक्षीत्। अद्रक्षत्। श्रु श्रवणे॥
श्रुवः शृ च। श्रुवः शृ आदेशः श्नुप्रत्ययश्च कर्तरि सार्वधातुके। शृणोति। सार्वधातुकमपित्। अपित्सार्व-
धातुकं ङित् स्यात्। शृणुतः। हुश्नुवोः सार्वधातुके। जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽसंयोगपूर्वोव-
र्णस्य यण् स्यादजादौ सार्वधातुके। शृण्वंति। शृणोषि। शृणुथः। शृणुथ। शृणोमि। लोपश्चास्यान्यतरस्यां
म्वोः। असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः। शृण्वः। शृणुवः। शृण्मः। शृणुमः॥ शुश्राव
शुश्रुवतुः। शुश्रुवुः। शुश्रोथ। शुश्रुवथुः। शुश्रुव॥ शुश्राव। शुश्रव। शुश्रुव। शुश्रुम। श्रोता। श्रोष्यति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म.सि. शृणोतु। शृणुतात्। शृणुतां। शृण्वंतु। उतश्च प्रत्ययादसंयोगपूर्वात्। असंयोगपूर्वात्प्रत्ययोतो हेर्लुक्। शृणु॥
१५ शृणुतात्। शृणुतं। शृणुत। उत्तमावादेशो। शृणवानि। शृणवाव। शृणवाम। अशृणोत्। अशृणुतां। अशृ-
ण्वन्। अशृणोः। अशृणुतं। अशृणुत। अशृणवं। अशृणुव। अशृणुव। अशृणुम। अशृणुव। शृणुयात्। शृ-
णुयातां। शृणुयुः। शृणुयाः। शृणुयातं। शृणुयात। शृणुयां। शृणुयाव। शृणुयाम। श्रूयात्। अश्रौषीत्
अश्रोष्यत्। गम्लृ सृ गतौ॥ इषुगमियमां छः। इति गच्छति। जगाम। गमहनजनखनघसां लोपः क्ङि-
त्यनङि। एषामुपधाया लोपो अजादौ क्ङिति न त्वङि। जग्मतुः। जग्मुः। जगमिथ। जगंथ। जग्मथुः। जग्म॥ उरुः
जगाम। जगम। जग्मिव। जग्मिम॥ गंता। गमेरिट् परस्मैपदेषु। गमेः सादेरार्द्धधातुकस्येट् परस्मैप १५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देषु।गमिष्यति।गच्छतु।अगच्छत्।गच्छेत्।गम्यात्॥पुषादिद्युताॢदितः परस्मैपदेषु।श्यन्विकरणा
पुषादेर्द्युतादेर्ॢदितश्च परस्य च्लेरङ् परस्मैपदेषु।अगमत्।अगमिष्यत्।सर्पति।अनुदात्तस्य चर्दु
पधस्यान्यतरस्यां।उपदेशेनुदात्तो य ऋदुपधस्तस्याम्वा झलादावकिति।स्रप्ता।सर्प्ता।असृपत्।ञि
क्ष्विदा अव्यक्ते शब्दे।क्ष्वेदति॥यभ मैथुने॥यभति।येभिथ।ययब्ध।झषस्तथोर्धोधः।झषः परयोस्तथयोर्धः स्या
न्न तु दधातेः॥ययब्ध।यब्धा।णम प्रह्वत्वे शब्दे च।नेमिथ।ननंथ।नंता।अनंसीत्।अनंसिष्टां॥त्यज हा
नौ॥त्यजति।तत्यजिथ।तत्यक्थ।त्यक्ता।अत्याक्षीत्॥अक्षू व्याप्तौ।अक्षोन्यतरस्यां श्नुः स्यात्कर्तरि ६२
सार्वधातुके पक्षे शप्।अक्ष्णोति।अक्षति।आनक्ष।आनक्षिथ।आनष्ठ।अक्षिता।अष्टा।अक्षिष्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

नि·
ति। स्कोरिति कलोपः॥ षठो कमिः। अक्ष्णाति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि॥ आक्ष्णोत्। आक्ष्णाव॥ अक्ष्णु
१८ यात्। अक्ष्णायुः। अक्ष्यात्। आक्षीत्। आक्षिष्टां। आक्षुः। नक्ष त्वक्ष तनूकरणे। तनूकरणे तक्षः। श्नुर्वा श्वाविष
ये। तक्ष्णोति। तक्षति वा काष्ठम्॥ ततक्षिथ। ततष्ठ। अतक्षीत्। अतक्षिष्टाम्। अताक्षीत्। अताष्टाम्। तनू
करणे किं। वाग्भिस्संतक्षति। भर्त्सयतीत्यर्थः। रक्ष पालने। रक्षति। णिक्ष चुम्बने। प्रणिक्षति। वक्ष रोषे॥
संघात इत्येके। वक्षति। मृक्ष संघाते। मक्ष इत्येके। तक्ष त्वक्ष त्वचने। त्वचनं संवरणम्। त्वचो ग्रहणं वा। पक्ष परि
ग्रह इत्येके। सूर्क्ष आदरे। सुसूर्क्ष। काक्षि वाक्षि माक्षि कांक्षायाम्। द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च॥ चूष गुरुः
पाने॥ तूष तुष्टौ। पूष वृद्धौ। मूष स्तेये॥ लूष रूष भूषायाम्। शूष प्रसवे॥ यूष हिंसायां। जूष च। भूष अलंका १८

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रे॥ जिज्ञये॥ जयति। संलियोर्जे॥ संज्ञिदिनि मित्रादभ्यासान्परस्यजेः कृतम्। जिगाय। जिगयिथ। जिगेथ॥
जीनप्रारणाधारतो। जीवति। पीवमी वनी वणी वस्यौल्मे। पी वीत। पिपी वा गु वी वंधने। उपधाया श्च।
धातोरुपधाभूतयोरेफवकारयोर्हल्परयोः परत इको दीर्घः। मूर्वति। मुमूर्व। पूर्व पर्व मर्व पूरणे। पूर्व
ति। पर्वति। वर्व अर्दने। कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः॥ शो षति। शिशेष। श्रा
ल स्युपधाद निटः क्सः॥ इगुपधोपः शालंतस्मादनिटश्च्लेः क्सादेशः। अशिक्षत्। तीघ सहलुभरुष
रिषः इच्छत्यादेः परस्यतादेरार्द्धधातुकस्येट् वा। रोषिता। रोष्टा। रेषिता। रेष्टा। भष भर्त्सने॥ हृष भर्त्स
ने। भ्वरवः। पुव पुष्टौ। पोषिता। भजदा स्नेषु पुष्येति रूपनानिर्देशादयमदादानः। आंगु धौ देवादिक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म·ति· स्पर्धमाना नाऽऽङः॥ अपोषीत्॥ श्विशु श्लिषु प्लुषु प्लुषु दाहे। श्वेषति। श्लेषति। प्रोषति। प्लोषति॥
१८ इति परस्मैपद प्रक्रिया॥ ○ ॥ एध वृद्धौ। टित आत्मनेपदानां टेरे। टितो लस्यात्मनेपदानां टे
रेत्वं॥ एधते। आतो ङितः। अतः परस्य ङितामात इय्। एधेते। एधन्ते। थासः से। टितो लस्य॥
एधसे। एधेथे। एधध्वे। एधे। एधावहे। एधामहे। इजादेश्च गुरुमतोऽनृच्छः। इजादिर्यो धातु
र्गुरुमानृच्छत्यन्यस्तत आम् लिटि। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य॥ आम्प्रकृत्या तुल्यमनुप्र श्रीः
युज्यमानात् कृञोऽप्यात्मनेपदं। लिटस्तझयोरेशिरेच्। एकारो श्चारणां तापकस्य॥ तङ्आदेशानां टेरे १८
त्वं नेति। तेन डारौरसान्त्रा। एधांचक्रे। एधांचक्राते। एधांचक्रिरे। एधांचकृषे। एधांचक्राथे॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इणः षीध्वंलुङ्लिटां धोऽङ्गात् । इस्मन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः । एधांचकृढ्वे । एधांचक्रे । एधां
चकृवहे । एधांचकृमहे । एधांबभूव । एधामास । अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न । अन्यथा हि
कृञ्चानुप्रयुज्यत इति कृभ्विति वा ब्रूयात् । एधिता । एधितारौ । एधितारः । एधितासे । एधितासा
थे । धि च । धादौ प्रत्यये सलोपः । एधिताध्वे । ह एति । तासस्त्योः सस्य । एधिताहे । एधितास्वहे । एधि
तास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे ।
एधिष्यामहे ॥ आमेतः । लोट एत आम् । एधताम् । एधेताम् । एधन्ताम् । सवाभ्यां वामौ । सवाभ्यां परस्य
लोडेतः क्रमाद्वामौ स्तः । एधस्व । एधेथाम् । एधध्वम् । एत ऐ । लोडुत्तमस्य । एधै । एधावहै । एधामहै ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म.ति. आध्वं। ऐधत। ऐधेतां। ऐधंत। ऐधथाः। ऐधेथां। ऐधध्वं। ऐधे। ऐधावहे। ऐधामहे॥ लिङः सीयुट्। लिङः सलोपो
१८ नंत्यस्य। लोपो व्योर्वलि। यकारवकारयोर्लोपः स्याद्वलि परः। एधेत। एधेयातां। झस्य रन्। लिङः। एधेर
न्। एधेथाः। एधेयाथां। एधेध्वं। इटोत्। लिङादेशस्य। एधेय। एधेवहि। एधेमहि। सुट् तिथोः। लिङस्तथोः
सुट्। यलोपः। एधिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधि
षीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां॥ आत्मनेपदेष्वनतः। अनात्परस्यात्मनेपदे झ
स्य अत्स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। ऐधि। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधि उ.ः
ष्येतां। ऐधिष्यंत। ऐधिष्यथाः। ऐधिष्येथां। ऐधिष्यध्वं। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। कमु कां १८

ॐ२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तो। कमेर्णिङ्। स्वार्थे। कामयते। अयामंताल्वाय्येत्निष्णुषु। एभ्यो णेरय्। कामयांचक्रे। आयादय इति वा॥
चकमे। चकमाते। चकमिरे। चकमिषे। चकमाथे। चकमिढ्वे। चकमे। चकमिवहे। चकमिमहे। कामयि
ता। कमिता। कामयिष्यते। कमिष्यते। कामयतां। अकामयत। कामयेत। कामयिषीष्ट। कमिषीष्ट
णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्। ण्यंतान्म्रादिभ्य श्चेश्चङ् कर्त्तर्थे लुङि। कामि अ त इति स्थिते। णेरनिटि॥
अनिआदावार्द्धधातुके परे णेर्लोपः। णौ चङ्युपधाया ह्रस्वः। चङ् परे णौ यदंगं तस्योपधाया ह्रस्वः
सन्वल्लघुनि चङ्परेनग्लोपे। चङ् परे णौ यदंगं तस्य योभ्यासो लघु परस्तस्य सनीव कार्यं स्यात्स्या व
ग्लोपे सति। सन्यतः। अभ्यासस्यात इत्स्यात्सनि। दीर्घो लघोः। लघोरभ्यासस्य दीर्घः सन्वद्भावविषये॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म॰ति॰ अचीकमत णिङ् । भावपक्षे । कमेश्च्लेश्चङ् वाच्यः । अचकमत । अकामयिष्यत ॥ अकमिष्यत । भाम क्रोधे
१९ भामते । बभामे । क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे । चक्षंसे । चक्षमिवहे । चक्षमिमहे ॥
म्वोश्च । मान्तस्य धातोर्मस्य नः म्वोः परतः । चक्षण्वहे । चक्षमिमहे । चक्षण्महे ॥ गाधृ प्रतिष्ठालि
प्सयोर्ग्रन्थे च । गाधते । बाधृ लोडने । लोडनं प्रतिघातः । बाधते । नाथृ नाधृ याच्ञोपतापैश्वर्याशीः
षु । आशिषि नाथ इति वाच्यं । अस्याशिष्येवात्मनेपदं स्यात् । नाथते । अन्यत्र नाथति । नाथते
दध धारणे । दधते । स्कुदि आप्रवणे । आप्रवणमुत्प्लवनमुद्धरणं वा । स्कुंदते । चुस्कुंदे । श्विदि श्वै उ॰त॰
त्ये । श्विंदते । शिश्विंदे । वदि अभिवादनस्तुत्योः । वंदते । ववंदे । भदि कल्याणे सुखे च । भंदते ॥ म १९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिस्तुतिमोदमदस्वप्नकांतिगतिषु। मंदते। स्पदि किंचिचलने। स्पंदते। मुद हर्षे। मोदते। मुमुदे। ऊर्द
माने क्रीडायां च। ऊर्दते। ऊर्दांचक्रे। कुर्द खुर्द गुर्द गुद क्रीडायामेव। कूर्दते। चुकूर्दे। गूर्दते। गोदते। जुगु
दे। षूद क्षरणे। सूदते। सुषूदे। ह्राद अव्यक्ते शब्दे। ह्रादते। जह्रादे। ह्लादी सुखे च। ह्लादते। ह्वाद अव्य
क्ते शब्दे। स्वाद आस्वादे। स्वादते। पर्द कुत्सिते शब्दे। गुदरवेत्यर्थः। पर्दते। यती प्रयत्ने। यतते। येते
श्रथि शैथिल्ये। श्रंथते। ग्रथि कौटिल्ये। ग्रंथते। कत्थि श्लाघायां। कत्थते। चकत्थे। श्लोकृ संघाते॥ सं
घातो ग्रंथः। सर्वेह ग्रथ्यमानस्य व्यापारो ग्रंथितुर्वा। आद्ये अकर्मको द्वितीये सकर्मकः। श्लोकते॥
शकि शंकायां। शंकते। शशंके। अकि लक्षणे। अंकते। आनंके॥ ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ना·ति ष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः॥ कंकते। वंगते। श्वंकते। त्रंकते। ढौकते। डुढौके। त्रौ
४० कते। तुत्रौके। ष्वष्कादीनां सत्वनिषेधः। ष्वष्कते। षष्वष्के। वस्कते। मस्कते। टेकते। टीकते।
तेकते। तीकते। रंघते। लंघते। श्लाघृ कंथने॥ श्लाघते। शश्लाघे। पवि वर्ज्जीकरणे। पंवते। अ
र्ज गति स्थानार्जने। पार्जने ७। अर्जने। तुर्वि धोक्का कारे कदे शारे फाह ध्वेन गृह्यते तेन विहृष्टा नु
ह। आनृजे। ऋजि भृजी भर्जने। ऋंजते। भर्जते। एजृ भ्रेजृ भ्राजृ दीप्तौ। एजते। भ्रेजते। बिभ्रेजे। भ्राजते
बभ्राजे। वेष्ट वेष्टने। वेष्टते। विवेष्टे। वेष्ट वेष्टायां। वेष्टते। विवेष्टे। स्फुट विकसने। स्फोटते। पुस्फोटे गुरुः
टे। वेष्ट कंपने। वेपते। कपि चलने। कंपते। भिक्ष भिक्षायामलाभे। लाभे वा। भिक्षते। दाश्र मों ग्रेस्रोप ४०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे। भाष व्यक्तायां वाचि। भाषते। वर्ष स्नेहने। वर्षते। ईह चे
ष्टायां। ईहते। गर्हते। गर्ह गल्ह कुत्सायां। गर्हते। गल्हते। काशृ दीप्तौ। काशते। ऊह वितर्के। ऊहते। कत्थ
मत्रक्रमप्यूहति पंडितो जनमूहति। अनुदात्तेत्वलक्षणमात्मनेपदमनित्यं। अनुदात्तेत्त्वक्षिञो ङि
त्करणात् ल्यपकान्तेन उदयति यदि भानुः। स्फायन्निर्मोकसंधिरित्यादि सिद्धमित्याहुः। अय
गतौ। अयते। उपसर्गस्यायतौ। अयते उपसर्गरेफस्य लत्वं। प्लायते। पलायते। दयायासश्च। ए
स्य आम्लिटि। अयांचक्रे। अयिता। अयिष्यते। अयतां। आयत। अयेत। अयिषीष्ट। विभाषेटः।
इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः। अयिषीढ्वं। अयिषीध्वं। आयिष्ट। आयि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

प०त्रि ष्ठं। आयिष्टां। आयिष्यत। द्युतदीप्तौ। द्योतते। द्युतिस्वाप्योः संप्रसारणं। अभ्यासस्यादि द्युते। द्योतिता। द्यो
२१ तिष्यते। द्योततां। अद्योतत। द्योतेत। द्योतिषीष्ट। द्युद्भ्यो लुङि। द्युतादिभ्यः परस्मैपदं वा लुङि। द्युतादी
त्पुङ्। अद्युतत्। अद्योतिष्ट। अद्योतिष्यत। एवं श्विता वर्णे। ञिमिदा स्नेहने। ञिष्विदा स्नेहनमोचनयोः॥
मोहनयोरित्येके। ञिक्ष्विदा चेत्येके। रुच दीप्तावभिप्रीतौ च। घुट परिवर्तने। शुभ दीप्तौ। क्षुभ संचल
ने। णभ तुभ हिंसायां। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। स्रंभु विश्वासे। वृतु वर्तने। वर्त्तते
ॠदुपधेभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन। ववृते। वर्तिता। वृद्भ्यः स्यसनोः। वृतादिभ्यः पंचभ्यो वा वृद्रः
परस्मैपदं स्यसनिवा। नवृद्भ्यश्चतुर्भ्यः। हन्‌द्वधस्थस्यं दृभ्यः सादेशार्द्धधातुकस्येटन तङानयोरभावे। व २१

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi